INDIAN JOURNAL OF HISTORY OF SCIENCE

Vol. 24 July 1989 No. 3

Supplement

RASA RATNA SAMUCCAYA

(Continued)

Seventh Chapter

Sanskrit Text

English Translation

Notes

अथ सप्तमोऽध्यायः

रसशालाप्रकरणनिरूपणीयम्

रसशाला प्रकरणम्

रसशाला योग्यस्थल निर्देशः

रसशालां प्रकुर्वीत सर्वबाधाविवर्जिते ।
सर्वौषधिमये देशे रम्ये कूपसमन्विते ॥ 1 ॥
यक्षत्र्यक्षसहस्राक्षदिग्विभागे सुशोभने ।

रसशालास्वरूपम्

नानोपकरणोपेतां प्राकारेण सुशोभिताम् ॥ 2 ॥

दिग्विभागानुसार शालाकर्मविभागः

शालायाः पूर्वदिग्भागे स्थापयेद्रसभैरवम् ।
वह्निकर्माणि चाग्नेये याम्ये पाषाणकर्म च ॥ 3 ॥
नैऋत्ये शस्त्रकर्माणि वारुणे क्षालनादिकम् ।
शोषणं वायुकोणे च वेधकर्मोत्तरे तथा ॥ 4 ॥
स्थापनं सिद्धवस्तूनां प्रकुर्यादीशकोणके ।

शालायां संग्राह्योपकरणानां निर्देशः

पदार्थसंग्रहः कार्यो रससाधनहेतुकः ॥ 5 ॥
सत्त्वपातनकोष्ठींच सुराकोष्ठीं सुशोभनाम् ।
भूमिकोष्ठीं चलत्कोष्ठीं जलद्रोण्योऽप्यनेकशः ॥ 6 ॥
भस्त्रिकायुगलं तद्वन्नलिके वंशलोहयोः ।
स्वर्णयोघोषशुल्वाश्मकुण्ड्यश्चर्मकृतास्तथा ॥ 7 ॥
करणानि विचित्राणि द्रव्याण्यपि समाहरेत् ॥ 8 ॥
कण्डणी पेषणी खल्वा द्रोणीरूपाश्च वर्तुलाः ।
आयसास्तप्तखल्वाश्च मर्दकाश्च तथाविधाः ॥ 9 ॥
सूक्ष्मच्छिद्रसहस्राढ्या द्रव्यगालनहेतवे ।
चालनी च कटत्राणि शलाका हि च कुण्डली ॥ 10 ॥

मूषामृत्तुषकार्पासवनोपलकपिष्टकम् ।
त्रिविधं भेषजं धातुजीवमूलमयं तथा ॥ 11 ॥
शिखित्रा गोवरंचैव शर्करा च सितोपला ।
काचायोमृद्वराटानां कूपिका चषकाणि च ॥ 12 ॥
शूर्पादिवेणुपात्राणि क्षुद्रक्षिप्राश्च शङ्खिकाः ।
क्षुरप्राश्च तथा पाक्यो यच्चान्यत्तत्र युज्यते ॥
पालिका कर्णिका चैव शाकच्छेदनशस्त्रिकाः ॥ 13 ॥

चालनीप्रकाराः स्वरूपं च

चालनी त्रिविधा प्रोक्ता तत्स्वरूपं च कथ्यते ।
वैणवीभिः शलाकाभिर्निर्मिता ग्रथिता गुणैः ॥
कीर्तिता सा सदास्थूलद्रव्याणां गालने हिता ॥ 14 ॥
चूर्णचालनहेतोश्च चालन्यन्यापि वंशजा ॥ 15 ॥
कर्णिकारस्य शाल्मल्या हरिजातस्य कम्बया ।
चतुरंगुलविस्तारयुक्तया निर्मिता शुभा ॥
कुण्डल्यरत्निविस्तारा छागचर्माभिवेष्टिता ॥ 16 ॥
वाजिबालाम्बरानद्धतला चालनिकाऽपरा ।
तया प्रचालनं कुर्याद्धतुं सूक्ष्मतरं रजः ॥ 17 ॥

अंगारपर्यायाः

शिखित्रा पावकोच्छिष्टा अंगारा कोकिला मताः ।
कोकिलाश्चेतिअंगारा निर्वाणाः पयसा विना ॥ 18 ॥

छगणपर्यायाः

पिष्टकं छगणं छाणमुपलंचोत्पलं तथा ।
गिरिण्डोपलसाठी च संशुष्कच्छगणाभिधाः ॥ 19 ॥

कूपिका नामानि

कूपिका कुपिका सिद्धा गोला चैव गिरिण्डिका ॥ 20 ॥

चषकनामानि

चषकं च कटोरी च वाटिका खारिका तथा ।
कंचोली ग्राहिका चेति नामान्येकार्थकानि हि ॥ 21 ॥

शालाकार्यसम्पादन विधिः

शालासम्मार्जनार्थीहि रसपाकान्तकर्म यत् ।
तत्रोपयोगि यच्चान्यत्तत्सर्वं परविद्यया ॥ 22 ॥

श्रीरसांकुशया सर्वं मन्त्रयित्वा समर्चयेत् ।
अन्यथा तद्गतं तेजः परिगृह्णन्ति भैरवाः ॥ 23 ॥

शालावैद्यगुणाः

रससञ्चिन्तका वैद्या निघण्टुज्ञाश्च वार्तिकाः ।
सर्वदेशजभाषाज्ञाः संग्रह्यास्तेऽपि साधकैः ॥ 24 ॥

रसपाकान्ते अघोरमन्त्रजापनिर्देशः

रसपाकावसानं हि सदाऽघोरंच जापयेत् ॥ 25 ॥

परिचारकगुणाः

सोद्यमाः शुचयः शूरा बलिष्ठाः परिचारकाः ॥ 26 ॥

रसवैद्यगुणाः

धर्मिष्ठः सत्यवाग्विद्वान् शिवकेशवपूजकः ।
सदयः पद्महस्तश्च संयोज्यो रसवैद्यके ॥ 27 ॥

अमृतहस्तलक्षणानि

पताकाकुम्भपाथोजमत्स्यचापांकपाणिकः ।
अनामाधःस्थरेखांकः स स्यादमृतहस्तवान् ॥ 28 ॥

दग्धहस्तलक्षणानि

अदेशिकः कृपामुक्तो लुब्धो गुरुविवर्जितः ।
कृष्णरेखाकरो वैद्यो दग्धहस्तः स उच्यते ॥ 29 ॥

निधिसाधकगुणाः

भूतनिग्रहमन्त्रज्ञास्ते योज्या निधिसाधने ॥ 30 ॥

बलिसाधकगुणाः

बलिष्ठाः सत्यवन्तश्च रक्ताक्षाः कृष्णविग्रहाः ।
भूतत्रासनविज्ञाश्च ते योज्या बलिसाधने ॥ 31 ॥

रसायनसाधकगुणाः

निर्लोभाः सत्यवक्तारो देवब्राह्मणपूजकाः ।
यमिनः पथ्यभोक्तारो योजनीया रसायने ॥ 32 ॥

धातुवादेनियोज्यपुरुषगुणाः

धनवन्तो वदान्याश्च सर्वोपस्करसंयुताः ।
गुरुवाक्यरता नित्यं धातुवादेषु ते शुभाः ॥ 33 ॥

भेषजाहरणे नियोज्यपुरुषगुणाः

तत्तदौषधनामज्ञाः शुचयो वंचनोज्झिताः ।
नानाविषयभाषाज्ञास्ते मता भेषजाहृतौ ॥ 34 ॥

केषां रसः सिद्धयति

शुचीनां सत्यवाक्यानामास्तिकानां मनस्विनाम् ।
सन्देहोज्झितचित्तानां रसः सिद्धयति सर्वदा ॥ 35 ॥

रसस्य महारसत्व निर्देशः

दशाष्टक्रियया सिद्धो रसोऽसौ साधकोत्तमः ।
महारसोऽयमित्युक्त्वा युंजात्सर्वत्र तं रसम् ॥ 36 ॥

रससिद्धगुणाः

रससिद्धो भवेन्मर्त्यो दाता भोक्ता न याचकः ।
जरामुक्तो जगत्पूज्यो दिव्यकान्तिः सदा सुखी ॥ 37 ॥

इति श्री वैद्यपति सिंहगुप्तस्य सूनोर्वाग्भटाचार्यस्य कृतौ रसरत्नसमुच्चये रसशालाप्रकरणं नाम सप्तमोऽध्यायः ।
